रणवत्तथा। विपर्य्ययेण विहिता सर्व्वस्त्रीणां फलागमः। दक्षिणेऽपि प्रशस्तोऽङ्गे प्रशस्तं स्याद्विशेषतः। अतोऽन्यथा सिद्धिप्रलम्भनात्तु फलस्य शस्तस्य च निन्दितस्य। अनिष्टचिह्नोपगमे द्विजानां कार्य्यं सुवर्णेन तु तर्पणं स्यात्"। [स्पृद्धेति अस्पर्द्धिष्ट।

**स्पर्द्ध** संहर्षे (पराभिभवेच्छायाम्) भ्वा० आत्म० अक० सेट्।

**स्पर्द्धा** स्त्री स्पर्द्ध–अ। १संहर्षे २पराभिभवेच्छायां ३साम्ये ४क्रमोन्नतौ च मेदि०। [स्पर्शं त।

**स्पर्श** ग्रहणे स्तेये च चु० आ० सक० सेट्। स्पर्शयते अप-

**स्पर्श** पु० स्पर्श-स्पृश–वा अच् घञ् वा। न्यायोक्ते १त्वगिन्द्रियग्राह्ये गुणभेदे २ग्रहणे "मात्रास्पर्शास्तु कौन्तेय" गीता। ३रोगे ४युद्धे ५गुप्तचरे मेदि० ६उपतप्ते अमरः। ७वायौ पु० ८स्पर्शके त्रि० मेदि०। स्पृश–णिच्–अच्। ९दाने मेदि० स्पृश्यन्ते वायुना जिह्वाग्रादय उच्चारणाय घञ्। १०कादिषु मावसानेषु वर्ग्यवर्णेषु पु० कादयोमावसानाः स्पर्शः सि० कौ०। "स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः। अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः। काठिन्यादिः क्षितावेव नित्यतादि च पूर्ववत्। एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्। तथापि परमाणौ स्यात् पाको वैशेषिके नये। नैवयायिकानान्तु नये द्व्यणुकादावपीष्यते" "स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः। अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः। काठिन्यादिः क्षितावेव नित्यतादि च पूर्ववत्। एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्। तत्रापि परमाणौ स्यात् पाको वैशेषिके नये। नैयायिकानान्तु नये द्व्यणुकादावपीष्यते" भाषा०। "उपकारक इति स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः। अनुष्णाशीतेति। पृथिव्या वायोश्च स्पर्शोऽनुष्णाशीतः। जलस्य शीतः। तेजस उष्णः। काठिन्येति। कठिनसुकुमारस्पर्शौ पृथिव्या एवेत्यर्थः। कठिनत्वादिकन्तु न संयोगनिष्ठो जातिविशेषः चक्षुर्ग्राह्यतापत्तेः। पूर्ववदिति। जलतेजोवायुपरमाणूनां स्पर्शो नित्यो द्व्यणुकादेस्त्वनित्य इत्यर्थः। एतेषामिति। एतेषां रूपरसगन्धस्पर्शानाम्। नान्यत्रेति। पृथिव्या हि रूपरसगन्धस्पर्शपरावृत्तिः पावकसंयोगादुपलभ्यते। न हि शतधापि ध्मायमाने जलादौ रूपादिकं परावर्त्तते। नीरे सौरभमौष्ण्यञ्च अन्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत्। तत्रापि पृथिवीष्वपि मध्ये परमाणावेव पाक इति वैशेषिकावदन्ति। तेषामयमाशयः। अवयविनाऽवष्टब्धेष्ववयविषु पाको न सम्भवति। परन्तु वह्निसंयोगेनावयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः। पुनश्च पक्वपरमाणुसंयोगाद्द्व्यणुकादिक्रमेण पुनर्महावयविपर्य्यन्तोत्पत्तिः तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशो झटिति व्यूहान्तरोत्पत्तिश्चेति। अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्भवतीति शिष्यबुद्धिवैशद्याय प्रक्रिया। "तत्र संयोगविभागयोरनपेक्षकारणं कर्म" इति वैशेषिकसूत्रम्। स्वोत्तरवृत्तिभावान्तरानपेक्षत्वं तस्यार्थः। अन्यथा कर्मणाऽप्युत्तरसंयोगस्य जनने पूर्वसंयोगनाशापेक्षणादव्याप्तिः स्यादिति। तत्र विभागजविभागानङ्गीकारे नव क्षणाः। तदङ्गीकारेऽपि विभागः किञ्चित्सापेक्षो विभागं जनयेत् निरपेक्षस्य तस्य कर्मत्वं स्यात्। तत्र यदि द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात् तदा दश क्षणाः। अथ द्रव्यनाशविशिष्टं कालमवयवं चापेक्ष्य विभागजविभागः स्यात् तदा एकादश क्षणाः। तथा हि वह्निसंयोगात् परमाणौ कर्म। ततः परमाण्वन्तरेण विभागः। तत आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशः१। ततः परमाणौ श्यामादिनाशः२। ततो रक्ताद्युत्पत्तिः३। ततो द्रव्यारम्भानुगुणक्रिया४। ततो विभागः५। ततः पूर्वसंयोगनाशः६। तत आरम्भकसंयोगः७। ततो द्व्यणुकोत्पत्तिः८। ततो रक्ताद्युत्पत्तिः ९। ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणक्रियाऽस्त्विति चेत्। न। अग्निसंयुक्ते परमाणौ यत् कर्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च तत्र परमाणौ क्रियान्तराभावात् कर्मवति कर्मानुत्पत्तेः निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च। तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेत् न। पूर्वरूपादिध्वंसस्य रूपान्तरे हेतुत्वात्। इति नव क्षणाः। अथ दश क्षणाः। सा च आरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागस्य जनने सति स्यात्। तथा हि वह्निसंयोगाद् द्व्यणुकारम्भके परमाणौ क्रिया। ततो विभागः। ततः आरम्भकसंयोगनाशः। ततो द्व्यणुकनाशविभागजविभागौ१। ततः श्यामनाशपूर्वसंयोगनाशौ२। ततो रक्तोत्पत्त्युत्तरसंयोगौ३। ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः४।